योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ८०

अशीतितमः सर्गः ८०

श्रीवसिष्ठ उवाच ।

इदमन्तः कलयतो भोगान्प्रति विवेकिनः ।

पुरःस्थितानपि सदा स्पृहैवाङ्ग न जायते ।। १

चक्षुरालोकनायैव जीवस्तु सुखदुःखयोः ।

भारायैव बलीवर्दो भोक्ता द्रव्यस्य नायकः ।। २

नयने रूपनिर्मग्ने क्षोभः क इव देहिनः ।

गर्दभे पल्वले मग्ने कैव सेनापतेः क्षतिः ।। ३

रूपकर्दममेतन्मानयनास्वादयाधम ।

नश्यत्येतन्निमेषेण भवन्तमपि हिंसति ।। ४

येनैव संख्या क्रियते येनैवाऽस्वाऽनुगम्यते ।

तदीयैः कर्मभिः क्षिप्रं प्राज्ञः क्रूरो निबध्यते ।। ५

उत्पन्नध्वंसि चापातमात्रहृद्यमसन्मयम् ।

रूपमाश्रय मा नेत्र विनाशायाविनाशिने ।। ६

साक्षिवत्त्वं स्थितं नेत्र रूपमात्मनि तिष्ठति ।

आलोकं कालवशतस्त्वमेकं किं प्रतप्यसे ।। ७

सलिलस्पन्दवद्दृष्टिः पिच्छिकेवाम्बरोत्थिता ।

सुजातिबन्धा स्फुरति तव चित्त किमागतम् ।। ८

कल्पाम्भसीव शफरी चित्ते स्फुरणधर्मिणि ।

स्वयं स्फुरत्यहंकारस्त्वमयं प्रोत्थितः कुतः ।। ९

आलोकरूपयोर्नित्यं जडयोः स्फुरतोर्मिथः ।

आधाराधेययोश्चित्तं व्यर्थमाकुलता तव ।। 5.80.१०

रूपालोकमनस्काराः परस्परमसङ्गिनः ।

संपन्ना इव लक्ष्यन्ते वदनादर्शबिम्ववत् ।। ११

अज्ञानजन्तुना ह्येते श्लिष्टा जाता निरन्तराः ।

अज्ञाने ज्ञानगिलिते पृथक्तिष्ठन्त्यसन्मयाः ।। १२

मनःकल्पनया ह्येते सुसंबद्धाः परस्परम् ।

रूपालोकमनस्कारा दारुणी जतुना यथा ।। १३

स्वमनोमननं तन्तुर्मनोभ्यासेन यत्नतः ।

विचाराच्छेदमायाति च्छिन्नैवाज्ञानभावना ।। १४

अज्ञानसंक्षयात्क्षीणे मनसीमे पुनर्मिथः ।

रूपालोकमनस्काराः संघट्टन्ते न केचन ।। १५

सर्वेषां चित्तमेवान्तरिन्द्रियाणां प्रबोधकम् ।

तदेव तस्मादुच्छेद्यं पिशाच इव मन्दिरात् ।। १६

चित्त वल्गसि मिथ्यैव दृष्टोऽन्तो भवतो मया ।

आद्यन्तयोः सुतुच्छं त्वं वर्तमाने विनश्यसि ।। १७

मुधा पञ्चभिराकारैः किमन्तः परिवल्गसि ।

यस्त्वां स्वमिति जानाति तस्यैव परिवल्गसि ।। १८

त्वद्वल्गनं मे कुमनो न मनागपि तुष्टये ।

मायामनःस्पन्द इव व्यर्थं वृत्तिषु दह्यसे ।। १९

तिष्ठ वा गच्छ वा चित्त नासि मे न च जीवसि ।

प्रकृत्यासि मृतं नित्यं विचारात्सुमृतं स्मृतम् ।। 5.80.२०

निस्तत्त्वं त्वं जडं भ्रान्तं शठं नित्यमृताकृते ।

मूढ एव त्वयाज्ञेन बाध्यो न प्रविचारवान् ।। २१

वयमज्ञातवन्तस्त्वां मौर्ख्येणाशु मृतं भवत् ।

मृतमस्माकमद्यासि दीपानां तिमिरं यथा ।। २२

शठेन भवता दीर्घकालं देहगृहं मम ।

उपरुद्धमभूत्सर्व साधुसंसर्गवर्जितम् ।। २३

जडे प्रेतसमाकारे गते त्वयि मनःशठे ।

सर्वसज्जनसंसेव्यमिदं देहगृहं मम ।। २४

पूर्वमेवासि नासीस्त्वं संप्रत्येव शठं जगत् ।

न भविष्यसि चेदानीं वेताल किं न लज्जसे ।। २५

सह तृष्णापिशाचीभिः सह कोपादिगुह्यकैः ।

निर्गच्छ चित्तवेताल शरीरसदनान्मम ।। २६

दिष्ट्या विवेकमात्रेण निर्गतो देहमन्दिरात् ।

प्रमत्तश्चित्तवेतालः कुवृकः कन्दरादिव ।। २७

अहो नु चित्रं सुमहज्जडेन क्षणभङ्गिना ।

मनःशठेन सर्वोऽयं नीतो विवशतां जनः ।। २८

कस्ते पराक्रमः किं ते बलं कस्ते समाश्रयः ।

यदि वल्गसि मामेकं जनानां बाधसे मृतम् ।। २९

सर्वथैवासि न मया दीनचित्तक मार्यसे ।

मृतमित्यवबुद्धं त्वमद्य केवलमज्ञ हे ।। 5.80.३०

एतावन्तमहं कालं त्वां ज्ञात्वा जीवदास्थिति ।

श्लिष्टः प्रभूतसङ्गासु चिरं संसृतिरात्रिषु ।। ३१

चित्तं मृतं हि नास्तीदमित्यद्याधिगतं मया ।

तेन त्वदाशां संत्यज्य तिष्ठाम्यात्मनि केवलम् ।। ३२

दिष्ट्या चित्तं मृतमिति ज्ञातमद्य मया स्वयम् ।

न शठेन समं नेयं समग्रं जीवितं निजम् ।। ३३

उत्सार्य देहसदनान्मनःशठमहं क्षणात् ।

अहं स्वस्थः स्थितोऽस्म्यन्तर्वेतालपरिवर्जितः ।। ३४

चित्तवेताललब्धेन चिरं कालं मयात्मना ।

कृताविकाराविविधाः स्वयं स्मृत्वा हसाम्यहम्।।३५

चिरान्निपातितो दिष्ट्या विचारासिपरार्दितः ।

हृद्गेहाच्चित्तवेतालस्तालोत्तालसमुन्नतिः ।। ३६

प्रशान्ते चित्तवेताले पवित्रां पदवीं गते ।

दिष्ट्या शरीरनगरे सुखं तिष्ठामि केवलम् ।। ३७

मृतं मनो मृता चिन्ता मृतोऽहंकारराक्षसः ।

विचारमन्त्रेण समः स्वस्थस्तिष्ठामि केवलम् ।। ३८

किं मनो मे ममाशा का को मेऽहंकारको भवेत् ।

दिष्ट्या व्यर्थं कलत्रं मे नष्टमेतदशेषतः ।। ३९

एकस्मै कृतकृत्याय नित्याय विमलात्मने ।

निर्विकल्पचिदाख्याय मह्यमेव नमो नमः ।। 5.80.४०

न शोकोऽस्ति न मोहोऽस्ति न चैवाहमहं स्वयम् ।

नच नाहं नचान्योऽहं मह्यमेव नमो नमः ।। ४१

न ममाशा न कर्माणि न संसारो न कर्तृता ।

न भोक्तृता न देहो मे मह्यमेव नमो नमः ।। ४२

नाहमात्मा न वा कोऽन्यो नाहमस्मि न चेतरः ।

सर्वमेवाहमेतस्मै मह्यमेव नमो नमः ।। ४३

अहमादिरहं धाता चिदहं भुवनान्यहम् ।

मम नास्ति व्यवच्छेदो मह्यमेव नमो नमः ।। ४४

निर्विकाराय नित्याय निरंशाय महात्मने ।

सर्वस्मै सर्वकालाय मह्यमेव नमो नमः ।। ४५

नीरूपाय निराख्याय प्रकाशाय महात्मने ।

स्वयमात्मैकसंस्थाय मह्यमेव नमो नमः ।। ४६

समां सर्वगतां सूक्ष्मां जगदेकप्रकाशिनीम् ।

सत्तामुपगतोऽस्म्यन्तर्मह्यमेव नमो नमः ।। ४७

साद्र्यब्ध्युर्वी नदी सेयं नाहमेवाहमेव वा ।

जगत्सर्वं पदार्थाढ्यं मह्यमेव नमो नमः ।। ४८

व्यपगतमननं समाभिरामं

प्रकटितविश्वमविश्वमप्यनन्तम् ।

स्वयमजमजरं गुणादतीतं

वपुरहमच्युतमीश्वरं नमामि ।। ४९

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये देव० मोक्षोपायेषूपशमप्रकरणे दृश्यदर्शनसंबन्धो नामाशीतितमः सर्गः ।। ८० ।।